ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका
Half Yearly [illegible] Journal
Vol. X [illegible] Sept. 2017 No.1
वर्षम् – १०, अप्रैल २०१७ – सितम्बर २०१७, अङ्कः – प्रथमः

# प्राचीसुधा

# PRACI SUDHA

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादक: सञ्चालकश्च
डॉ. विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा
PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
PURI, ODISHA

Scanned by CamScanner

# वैदिकवाङ्मये पितृदेवता

डॉ. शत्रुघ्नपाणिग्राही

पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ।।[१]

इति शुक्लयजुर्वेदीयमन्त्रानुसारं ज्ञायते पितृदेवानां सकाशात् अपि हविप्रदानं भवति । यदा देवानां कृते आहुतिः प्रदीयते तदा स्वाहाकारेण भवति परन्तु पितृदेवस्य कृते स्वधाकारेण अत्र "स्वधा वै पितृणामन्नम्" इति श्रुतिवचनात् ज्ञायते स्वाधायिभ्यः स्वाधामन्त्रं प्रति पितरः गच्छन्तीति । पितरः अपि देवरूपा भवन्ति । अतः मनुनामुक्तम् – "पितृदेवमनुष्याणाम्"[२] इति । त्रिषु लोकेषु पितृलोकानां स्थानं स्वतन्त्रं वर्तते । अस्य लोकस्य देवः यमः । पितृजनाः तस्य मार्गदर्शनेन तिष्ठन्ति । मृत्योरनन्तरं मृतकः यदा स्वर्गे तिष्ठति तदा सः पितृदेवः इति नाम्ना ज्ञायते ।

**पितृपुरुषाणां प्रकारभेदः –**

वैदिकमन्त्रानुसारं पितरः त्रिविधाः उत्तम-मध्यम-अधमभेदात् । ये श्रौतस्मार्तकर्मकृताः तत्फलेन पितृत्वमुगताः ते उत्तम-मध्यमस्तरीयाः पितरः संस्कारविरहिताः ते अधमाः पितरः इति कथ्यन्ते ।[३] पुनः तत्रापि भेदः दृश्यते । प्राचीनार्वाचीनरूपेण । ऋग्वेदे एकस्मिन् मन्त्रे अस्माकमंगिरसः अथर्वनामकाः, भृगुवश्चैते त्रिविधाः पितरः[४] यज्ञेषु आगताः सन्ति तथा च ते अत्यन्तमेव दिव्यस्वरूपाः, सोमरसपानस्पृहाः सन्ति, अतो वयं यजमानाः मन्त्रद्रष्टारः, ऋषयो वा तेषां यज्ञार्हाणां पितृणां सर्वदा कल्याणमतौ तिष्ठेम । तथैव च तेषां सुन्दरमनसि कल्याणे च स्याम । अर्थात् यथा तेषां शुभं मनः तथा एवास्माकं यजमानानां वा स्यात् तथा च भद्रात्मकं तेषां पितृणां मनस्तथैवास्माकं वा भवतु अथवा तेषां पितृणां भद्रात्मके मनसि अस्माकं भागोऽस्ति तथैव च सौमनसे कल्याणे फले वयं सर्वदा तिष्ठेम इति वर्णनं दृश्यते । इमे सर्वेऽपि पितरः वृकवत् हिंसां न कुर्वन्तः अस्मदनुष्ठितं यज्ञं जानन्तः अस्मत्प्राणं रक्षितुं प्राप्ताः ते पितरः अस्मदियेषु आह्वानेषु अस्मान् रक्षन्तु । बर्हिषदपितरः[५], अग्निष्वात्तापितरः[६], सोमरसपानप्रियापितरः[७], अग्निदग्धापितरः[८], अनग्निदग्धापितरः सर्वे यज्ञस्थले आगत्य स्वधारूपमन्नं स्वीकृत्य अस्मात् सर्वान् यजमानान् दुःखवियुक्तेन मुखेन युक्तान् कुर्वन्त्युति प्रार्थना ऋग्वेदे दृश्यते । पुनश्च षड्वा ऋतवः पितरः इति श्रुतेः । रसादिशब्दे वसन्तादिषड्तव

उच्यन्ते । ते च पितृणां स्वरूपभूता: अतस्तेभ्यो जीवपुरुष: नमस्करोति, यथा –

नमो व: पितरो रसाय नमो व: पितर: शेषाय नमो व: पितरो जीवाय नमो व: पितर: स्वधायै नमो व: पितरो घोराय नमो व: पितरो मन्यवे नमो व: पितर: पितरो नमो वो गृहान्न: पितरो दत्त सतो व: पितरो देष्मैतद्व: पितरो वासं अधत्त ।।[९]

**अग्निना सह पितृपुरुषाणां सम्बन्ध: –**

अग्निदेव: पितृपुरुषाणां विषये सर्वं जानाति । ये पितर: अस्मत्समीपे उपस्थिता: सन्ति, ये च इह न सन्ति, यान् वयं जानीम: यान् च न जानीम:, यावन्तस्ते भवन्ति तान् सर्वान् अग्निदेव: जानाति[१०] । अतो हे जातवेदोऽग्ने! त्वमपि हविर्भिरिमं यज्ञमुपसेवस्य । अत: होतारूप: अग्निदेव: अस्माकं यज्ञस्थले पितृभि: सह आगच्छतु । श्रूयते यथा –

ये तातृषुर्देवत्रा जेहमाना होत्रविद: स्तोमतष्टासो अर्कै: ।

आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यै: कव्यै: पितृभिर्धर्मसद्भि: ।।[११]

यस्यार्थो भवति ये अग्ने! त्वं क्रमेण स्वकर्मभि: देवत्वं प्राप्ता: यज्ञविधिवेत्तार: अर्चनीयस्तोत्रै: यज्ञानां कर्तार: ये पितर: इच्छां कुर्वन्ति तै: सुविदत्रै: सत्यभाषिभि: मेधाविभि: यज्ञसादिभि: पितृभि: सह अस्माकं सम्मुखम् आगच्छ ।

कर्मानुसारं पुनर्जन्मग्रहणाय स्वर्गवासाय वा पितृपुरुषान् स्वर्गलोकं नरकलोकं वा प्रापयति अग्निदेव: । अस्माभि: स्तुत: स: अस्मदीयानि हव्यानि सुगन्धीनि कृत्वा पितृभ्यो ददाति[१२] । येन ते पितर: प्रसन्ना: भवन्त: स्वधया प्रदत्तानि हवींषि भक्षयन्ति ।

**यमदेवेन सह पितृपुरुषाणां सम्बन्ध: –**

पौरणिकसम्प्रदायानुसारं यम: पितृलोकस्य राजा अस्ति, यत्र मरणान्तरं पितर: निवसन्ति ।[१३] पितृलोकस्य देव: यम: । पितृजना: तस्य मार्गदर्शनेन तिष्ठन्ति । मृत्योरनन्तरं मृतक: यदा यमपुरे तिष्ठति तदा स: यमस्य अधीनं भवति । स: प्रेतात्मानं प्रकाशयुतं स्थलं प्रपयति । उलूक: कपोत: च एवस्य दूतौ भवत: । चतुरक्ष: दीर्घघोणा तथा कुक्कुर: ईमे तस्य सेवका: ते मार्गरक्षणं कुर्वन्ति । मृतकं तें यमसमीपं नयन्ति । यम: अङ्गिरोभि: पितृविशेषै: सह वर्धते । श्रूयते यथा –

अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।

विवस्वन्तं हुवे य: पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य ।।[१४]

अर्थात् हे यम! विविधरूपधारिभि: अङ्गिरोभि: पितृविशेषै: सह आगच्छ, आगत्य यज्ञेऽस्मिन् यजमानं हर्षय । तव पितरं विवस्वन्तम् अस्मिन् यज्ञे आह्वयामि । स: कुशेषु उपविश्य यजमानं हर्षयन्तु । पुनश्च यम: पितृपुरुषै: सह क्रीडामपि करोतीति श्रूयते ऋग्वेदे यथा –

Scanned by CamScanner

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ।।[१५]

अन्यैः देवैः सह पितृपुरुषाणां सम्बन्धः –

पितृपुरुषाणां सम्बन्धः सोम[१६]-बृहस्पति-इन्द्रादयदेवैः सह वर्तते । स्तुतिक्रियाप्रधानैः ऋक्वभिः पितृविशेषैः बृहस्पतिदेवः समृद्धिमवाप्नोति । तत्र इन्द्रादयो देवाः यान् पितृन् वर्धयन्ति तथा ये पितरः इन्द्रादि देवान् वर्धयन्ति तेषु देवाः स्वाहाकारेण समृद्धाः जायन्ते तथा पितरः स्वधाकारेण तृप्ताः जायन्ते इति ऋग्वेदे श्रूयते यथा –

मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ।।[१७]

अग्निदेवः हविर्भक्षयितारः दक्षिणः पातारः इन्द्रेण अन्यैः देवैः सह एकस्मिन् रथे उपविष्टाः ये पितरः तैः सह तथा बहुभिः देवसम्बन्धिभिः स्तोत्रैः युक्तैः परकालीनैः पूर्वकालीनैः तथा धर्मसिद्धिः पितृभिः सह अस्माकं पुर आगच्छतु इति वर्णनमपि दृश्यते ।[१८]

देवयानपितृयाणयोः प्रत्येकं चातुर्विध्यम् –

मरणधर्मिणां प्राणिनां द्वौ मार्गौ स्तः । स एष देवयानो वा पितृयाणो वा पन्था इति श्रुतेः । देवानां मार्ग एकः उतापि च पितॄणाम् देवमार्गः पितृमार्गश्चेति । पितरं मातरं द्यौः पिता पृथिवी मात । असौ वै पितेयं माता इति श्रुतेः ।[१९] पितरं मातरं च अन्तरा भूलोकद्युलोकयोर्मध्ये तत् कम्पमानं क्रियावत् विश्वं सर्वमिदं ताभ्यां देवयानपितृयाणाभ्यां संगच्छते ।[२०] नास्ति पातो यत्र स नपातो देवयानपथः । यत्र गतानां पातो नास्ति विविधं क्रमणं गमनागमनं यत्र स विक्रमणः पितृयाणपथः । यत्र गतानां पुनर्गतान्ते पतनं यज्ञसम्बन्धिनौ देवयानपितृयाणौ पन्थानौ वेद्मीत्यर्थः ।[२१]

सावित्रकालमारभ्य दिनान्तरप्रवृत्त्या सुमेरुस्थले तद्गतस्योषःकालोत्तरस्य सावित्रकालस्य दिनान्तरप्रारम्भकतया ततः प्रवर्तमानं तृतीयं देवयानम् । तत्रादित्योदये दैवदिनप्रारम्भेणेदं चतुर्थं देवयानम् । ते चेमे चत्वारो देवयानाः पन्थानो भवन्ति । देवयनानां चातुर्विध्ये तद्विरुद्धाः पितृयाणा अपि पन्थानश्चतुर्विधा भवन्ति । तदुक्तं – “ये चत्वारः पथयो देवयाना अन्तरा द्यावपृथिवी वियन्ति । तेषामज्यानिमजीतिमावहान् तस्मै नो देवाः परिदत्तेह सर्वे”[२२] इति ।

पितृयाणस्य देवयानभिन्नत्वाभिप्रायेण यमसूक्ते यमं प्रति उच्यते – “यस्ते स्व इतरो देवयानाद्”[२३] इति । एवं च देवयानपितृयाणयोरेव दक्षिणोत्तरायणस्वरूपम् । अतः पितृकर्माणि सर्वाणि दक्षिणाभिमुखिभूत्वा परिपाल्यते अस्माभिः । श्रूयते यथा –

Scanned by CamScanner

आच्य जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ।।[२४]

पितृपुरुषाणां लोकपकारकत्वम् –

वेद्याम् उपविष्टाः पितरः हविर्दत्तवते यज्ञमानाय सर्वविधमैश्वर्यं प्रयच्छन्ति । यजमानस्य पुत्रेभ्यः धनं ददति । गर्भस्थशिशोः धारणं करोति ।[२५] अपि च सर्वे यज्ञे आगत्य यजमाने बलं, प्राणान् धनञ्च स्थापयन्ति ।[२६] अनुग्रहपरायणाः सोमरसपानप्रियाः पितरः अस्मान् शोधयन्ति ।[२७] यज्ञार्हेषु तृप्तिदायकेषु हविःषु अस्माभिः ते आहूताः भवन्ति । ते सर्वे पितरः यज्ञवेद्याम् आगत्य अस्माकं स्तोत्राणि शृण्वन्ति, यजमानोऽयं प्रशंसनीयः इति कथयन्ति तथा च अस्माकं सर्वेषां मनुष्याणां कृते आशीर्वादरूपेण वीर-पुत्र-पौत्रसंभूषितं धनञ्च प्रदाय लोकोपकारककार्यं कुर्वन्ति । ऋग्वेदे श्रूयते यथा – हे बर्हिषदः पितरः । अर्वाचीनानामस्माकं यजमानानां रक्षा भवद्भिः कार्या । युष्मदर्थं मया निष्पादितानि एतानि हवींषि यूयं सेवध्वम् । तादृशोर्हविजुष्टवन्तो यूयं पितरः सुखतमेन रक्षणेन युक्तः सन्तोऽस्माकं यज्ञे आगत्य अस्मान् सर्वान् यजमानान् दुःखवियुक्तेन सुखेन पुण्येन वा युक्तान् कुरुत ।[२८]

वैदिकवाङ्मयस्यानुशीलनेन ज्ञायते यत् पितरः अग्न्यादिर्देवैः सह हविर्द्रव्यं, पेयञ्च गृह्णन्ति, अस्माकं सर्वेषां मानवानां कल्याणं कुर्वन्ति ।। शम् ।।

---


सन्दर्भसूची –

१. शुक्लयजुर्वेद – १९/३६ २. मनुस्मृतौ – १२/९४

३. उदीरतामवर उत्परास उन्मध्यमाः पितः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ।। ऋग्वेदः – १०/१५/१, अथर्ववेदः – १८/१/४४, शु.य. – १९/४९

४. अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ।।६।। ऋग्वेदः – यमसूक्तम् – १०/१४/६, तै.सं. – २/६/१२, शु.य. – १९/५०

५. बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वम् ।
ता आ गतावसा शंतमेनाऽथा नः शं योररपो दधात ।। ऋग्वेदः – १०/१५/४, अथर्ववेदः – १८/१/५१, शु.य. – १९/५५

६. अग्निष्वात्ता पितर एह गच्छत सदः सदः सदत सुप्रणीतयः ।
उत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ।। ऋग्वेदः – १०/१५/११
आयन्तु नः पितरः सम्यासोऽग्निष्वात्ताः । – शुक्लयजुर्वेदः – १९/५८


Scanned by CamScanner

७. उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ।। ऋग्वेदः – १०/१५/५, शु.य. – १९/५७

८. ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते । तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ।। ऋग्वेदः – १०/१५/१४

९. शुक्लयजुर्वेदः – २/३२

१०. ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ।। ऋग्वेदः – १०/१५/१३, शु.य. – १९/६७

११. ऋग्वेदः – १०/१५/९, अथर्ववेदः – १८/३/४७

१२. त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी । प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ।। ऋग्वेदः – १०/१५/१२, अथर्ववेदः – १८/३/४२

१३. ये समानाः समनसः पितरो यमराज्ये । शुक्लयजुर्वेदः – १९/४५

१४. ऋग्वेदः – १०/१५/१४  १५. ऋग्वेदः – १०/१५/८

१६. शुक्लयजुर्वेदः – १९/५३

१७. ऋग्वेदः – यमसूक्तम् – १०/१४/३, अथर्ववेदः – १८/१/४७

१८. ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः । आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ।। ऋग्वेदः – १०/१५/१२, अथर्ववेदः – १८/३/४८

१९. शत.ब्रा. – १२/८/१/२१  २०. शुक्लयजुर्वेदः – १९/४७

२१. शु.य. – (महीधरभाष्यम्) – १९/५६

२२. छान्दोग्यमन्त्रब्राह्मणम् – २/१/१०  २३. ऋग्वेदः – १०/१८/१

२४. ऋग्वेदः – १०/१५/६, अथर्ववेदः – १८/१/५२, शु.य. – १९/६२

२५. आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोऽसत् ।। शु.य.– २/३३

२६. आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय । पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ।। ऋग्वेदः – १०/१५/७, अथर्ववेदः – १८/३/४३, शु.य. – १९/६३

२७. पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा । शु.य.– १९/३७

२८. ऋग्वेदः – १०/१/४

—०—

वेदवेदाङ्गसङ्कायाध्यक्षः,
श्रीसोमनाथसंस्कृतयूनिवर्सिटी, वेरावलम्, गुजरात।

Scanned by CamScanner